योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०२२

द्वाविंशः सर्गः २२

श्रीवसिष्ठ उवाच ।

ज्ञानेन ज्ञेयनिष्ठत्वाद्योऽचित्तं चित्तमेव च ।

न बुध्यते कर्मफलं स ज्ञानीत्यभिधीयते ।। १

ज्ञात्वा सम्यगनुज्ञानं दृश्यते येन कर्मसु ।

निर्वासनात्मकं ज्ञस्य स ज्ञानीत्यभिधीयते ।। २

अन्तःशीतलतेहासु प्राज्ञैर्यस्यावलोक्यते ।

अकृत्रिमैकशान्तस्य स ज्ञानीत्यभिधीयते ।। ३

अपुनर्जन्मने यः स्याद्बोधः स ज्ञानशब्दभाक् ।

वसनाशनदा शेषा व्यवस्था शिल्पजीविका ।। ४

प्रवाहपतिते कार्ये कामसंकल्पवर्जितः ।

तिष्ठत्याकाशहृदयो यः स पण्डित उच्यते ।। ५

अकारणं प्रवर्तन्त इव भावा अकारणात् ।

अविद्यमाना अप्येतेऽविद्यमाना इव स्थिताः ।। ६

आविर्भावतिरोभावैर्भावाभावभवाभवैः ।

पश्चात्कारणतां यान्ति मिथः कारणकर्मभिः ।। ७

असतः शशश्रृङ्गादेर्मृगतृष्णाम्भसो यथा ।

आलोकनादलभ्यस्य कीदृक् स्यात्किल कारणम् ।। ८

असतः शशश्रृङ्गादेः कारणं मार्गयन्ति ये ।

वन्ध्यापुत्रस्य पौत्रस्य स्कन्धमासादयन्ति ते ।। ९

असत्यप्रतिभासानामेतदेवाशु कारणम् ।

यदनालोकनं नाम समालोकक्षणक्षयम् ।। १०

परमात्मायते जीवो बुध्यमानस्त्वचेतनम् ।
चेतनं बुध्यमानस्तु जीव एवावतिष्ठते ।। ११
परमात्मैव जीवोऽयं बुध्यमानस्त्वचेतनम् ।
आम्र एव रसापत्तेः प्रयाति सहकारताम् ।। १२
चेतनं बुध्यमानस्तु जीव एवावतिष्ठते ।
जीवो जीवितजीर्णेषु जातिजन्मसु जर्जरः ।। १३
ये परां दृष्टिमायाता विधि तेषामपामिव ।
अरूपालोकमननं स्पन्दमस्पन्दनं सदा ।। १४
ये परां दृष्टिमायाता दृश्यश्रीपारदर्शिनः ।
न विद्यमानमप्यस्ति तेषां वेदनमाततम् ।। १५
ये परां दृष्टिमायाता विद्धि तेषामपामिव ।
स्पन्दमस्पन्दनं सर्वमवेदनवशादिह ।। १६
अरूपालोकमननवेष्टिता मुक्तदामवत् ।
बुधाः कर्मसु चेष्टन्ते वृक्षपत्रेष्विवानिलः ।। १७
ये परां दृष्टिमायाताः संसृतेः पारदर्शिनः ।
न ते कर्म प्रशंसन्ति कूपं नद्यां वसन्निव ।। १८
ये बद्धवासना मूढाः कर्म शंसन्ति तेऽनघ ।
श्रुतिस्मृत्युचितं तेन विनाबोधं प्रयान्ति ते ।। १९
इन्द्रियाणि पतन्त्यर्थं भ्रष्टं गृध्र इवामिषम् ।
तानि संयम्य मनसा युक्त आसीत तत्परः ।। २०
नासन्निवेशं हेमास्ति नासर्गं ब्रह्म विद्यते ।
किंतु सर्गादिशब्दार्थमुक्तं युक्तमतेः शिवम् ।। २१
एकान्धकारे संपन्ने व्यवहारो युगक्षये ।
निर्विभागो निराभासो यथा ब्रह्मघने तथा ।। २२
अभ्रोदरे भ्रमाङ्गानां स्पन्दास्पन्दमयी यथा ।
स्वसंविदात्मिका सत्ता भूतानामीश्वरी तथा ।। २३

जलस्यान्तर्जलांशानां द्वैताद्वैतमयो यथा ।

स्वसंविदात्मा सुस्पन्दस्तथा ब्रह्मणि भूतदृक् ।। २४

यथाम्बरेऽम्बरांशानां द्वैताद्वैतकृतात्मनि ।

अनन्या सृष्टिराभाति तथानवयवे शिवे ।। २५

जगतोऽन्तरहंरूपमहंरूपान्तरे जगत् ।

स्थितमन्योन्यवलितं कदलीदलपीठवत् ।। २६

रूपालोकमनस्कारै रन्ध्रैर्बहिरिव स्थितम् ।

सृष्टिं पश्यति जीवोऽन्तः सरसीमिव पर्वतः ।। २७

जीवो जगत्तयात्मानं पश्यत्ययमकारणम् ।

हेमेव कटकादित्वं तदपश्यन्न पश्यति ।। २८

जीवन्तोऽपि न जीवन्ति म्रियन्ते न मृता अपि ।

सन्तोपि च न सन्तीव पारावारविदः शुभाः ।। २९

प्रबुद्धः सर्वकर्माणि कुर्वन्नपि न पश्यति ।

गृहकर्माणि गेहस्थो गोष्ठभाण्डमना इव ।। ३०

विराड् हृदि यथा चन्द्रः प्रतिदेहं यथा स्थितः ।

जीवो हिमकणाकारः स्थूले स्थूलो लघौ लघुः ।।३१

अहमात्मा त्रिकोणत्वमुपगच्छति कल्पनम् ।

असदेव सदाभासं मन्यते चेतनाद्वपुः ।। ३२

कर्मकोशे त्रिकोणे च शुक्रसारेऽवतिष्ठते ।

देहे जीवोहमित्यात्मा स्वामोदः कुसुमे यथा ।। ३३

अहमित्येव शुक्रस्था संविदापादमस्तकम् ।

विसरत्यखिले ज्योत्स्ना यथा ब्रह्माण्डमण्डपे ।। ३४

अक्षरन्ध्रप्रणालेन विसृतं वेदनोदकम् ।

व्याप्नोति त्रिजगद्धूमो वियन्मेघतया यथा ।। ३५

देहे यद्यप्यशेषेऽस्मिन्बहिरन्तश्च वेदनम् ।

विद्यते तत्तथाप्यत्र शुक्रेऽस्ति घनवासना ।। ३६

जीवः संकल्पमात्रात्मा यत्संकल्पोऽवतिष्ठते ।
हृदि भूत्वा स एवाशु बहिः प्रसरति स्फुटम् ।। ३७
यथास्थितां च निश्चित्तां वर्जयित्वा स्थिरोपमाम् ।
न कयाचिदपि स्थित्या शाम्यत्यहमिति भ्रमः ।। ३८
चिन्तानुचिन्त्यमानापि भावनीयाम्बरोपमा ।
अहंभावोपशमने शमनेन क्रमेण ते ।। ३९
तज्ज्ञा व्यवहरन्तीह भाव्यभावनवर्जितम् ।
अरूपालोकमननं मौनं दारुनरा इव ।। ४०
अकिंचिद्भावनो यः स्यात्स मुक्त इति कथ्यते ।
जीवन्नाकाशविशदो बन्धशून्य इव स्फुटम् ।। ४१
अहमित्येव शुक्रस्था संविदापादमस्तकम् ।
विसरत्यखिले देहे ब्रह्माण्डेऽर्कप्रभा यथा ।। ४२
दृङ्नेत्रं स्वदनं जिह्वा श्रुतिः श्रोत्रं भवत्यसौ ।
इत्याद्या वासनाः पञ्च बद्ध्वा तासु निमज्जति ।। ४३
चिद्भावोऽक्षतयोदेति मनो भूत्वैकदेशतः ।
सर्वगोऽपि रसो भूमौ यथाङ्कुरतया मधौ ।। ४४
यो भावयति भावेषु नेह रूढेष्वभावताम् ।
तस्यायत्नवतो दुःखमनन्तं नोपशाम्यति ।। ४५
येन केनचिदाच्छन्नो येन केनचिदाशितः ।
यत्र क्वचनशायीह स सम्राडिव राजते ।। ४६
वासनाभिरुपेतोऽपि समग्राभिरवासनः ।
अन्तःशून्योऽप्यशून्यात्मा खमिव श्वसनान्वितः ।। ४७
आसने शयने याने स्थितो यत्नेन बोध्यते ।
निद्रालुरिव निर्वाणमनोमनननिर्वृतः ।। ४८
संविन्मात्रं हि पुरुषः सर्वगोऽपि स तिष्ठति ।
स्फुटसारे शरीरस्य यथा गन्धोऽब्जकेसरे ।। ४९

संविन्मात्रं विदुर्जन्तुं तस्य प्रसरणं जगत् ।
आत्मनिष्ठत्वमजगत्परमेत्युपदेशभूः ।। ५०
नीरसो भव भावेषु सर्वेषु विभवादिषु ।
पाषाणं हृदयं कृत्वा यथा भवसि भूतये ।। ५१
साधो हृदयसौषिर्यमसौषिर्यमिवास्तु ते ।
अचित्त्ववपुषोऽचित्त्वादुपलस्येव राघव ।। ५२
तज्ज्ञाज्ञयोरशेषेषु भावाभावेषु कर्मसु ।
ऋते निर्वासनत्वात्तु न विशेषोऽस्ति कश्चन ।। ५३
सत्तैवैषा विदो यत्सा भवत्युन्मिषिता जगत् ।
परं तत्त्वं निमिषता दृगिवानामकं ततम् ।। ५४
दृश्यं विनश्यत्यखिलं विनष्टं जायते पुनः ।
यन्न नष्टं न चोत्पन्नं तत्सद्भवति तद्भवान् ।। ५५
भावज्ञप्तिर्हि निर्मूला भावितापि न विद्यते ।
सलिलं मृगतृष्णेव न ददाति भवाङ्कुरम् ।। ५६
यथाभूतार्थसदर्शाच्छिन्नाऽहमिति भावना ।
दृष्टामि न करोत्यन्तर्दग्धं बीजमिवाङ्कुरम् ।। ५७
कर्म कुर्वन्नकुर्वन्वा वीतरागो निरामयः ।
निर्मना नित्यनिर्वाणः पुमानात्मनि तिष्ठति ।। ५८
चित्तोपशान्तौ संशान्ताः शान्ताये भोगबन्धवः ।
न स्वभावपरिक्षीणाश्चित्तमेषां किलाकरः ।। ५९
अघनः केवलालोको बुधो जीवः परायते ।
स एवान्योऽप्यनन्योऽन्तरपराह्न इवातपः ।। ६०
एकदेशस्थितात्पुंसो दूरायातस्य चेतसः ।
यद्रूपं सकलं मध्ये तद्रूपं परमात्मनः ।। ६१
चारुचिद्व्योमकर्पूरं यच्चमत्कुरुते स्वयम् ।
अनन्तमन्तरव्यक्तं जगदित्येव वेत्ति तत् ।। ६२

गतभवभ्रमभासुरमक्षयं

शममुपेतमुपेक्षितदीपवत् ।

स्थितमपीह जनं जगदीश्वरा-

दनुगतं ननु भाति मुदा च खे ।। ६३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे उत्तरार्धे सुखयोगोपदेशो नाम द्वाविंशः सर्गः ।। २२ ।।